रोल नं0 | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 5

**028** **228 (HBF)**

# 2015
# संस्कृतम्
(केवल प्रश्नपत्रम्)

अवधि : होरात्रयम् ] [ पूर्णांक : 100

निर्देश : (i) अस्मिन प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने लेखनीयानि।
(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।
(v) प्रश्न संख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(vi) खण्डसंख्या अपि लेखनीया।

## खण्ड – 'क' (अपठितांश–अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत :–

महाकविः कालिदासः संस्कृतवाङ्मयस्य श्रेष्ठः कविः आसीत्। सः त्रीणि नाटकानि लिखितवान्। तेषु अभिज्ञानशाकुन्तलम् अति प्रसिद्धं नाटकम् अस्ति। अस्मिन् नाटके सप्त–अङ्काः सन्ति। अस्य विषये केन कथितम्–'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला'। अस्य नाटकस्य नायकः दुष्यन्तः नायिका च शकुन्तला। दुष्यन्तः हस्तिनापुरनरेशः, शकुन्तला मेनकायाः पुत्री चासीत्।

(क) एकपदेन उत्तरं लिखत :– 1×2=2
(i) महाकविः कालिदासः कस्य वाङ्मयस्य श्रेष्ठः कविः आसीत् ?
(ii) अभिज्ञानशाकुन्तले कति अङ्काः सन्ति ?

(ख). पूर्ण वाक्येन उत्तरत :– 1
(i) शाकुन्तलविषये केन किं कथितम् ?

(ग) निर्देशानुसारम् उत्तरत :– 1×2=2
(i) 'लिखितवान्' इति क्रियापदस्य कर्तृपदं लिखत।
(ii) 'तत्र' इति पदस्य विलोमपदं लिखत।

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत :–

परेषां जनानाम् उपकारः परोपकारः कथ्यते। परोपकाराय स्वार्थत्यागः परमावश्यकः अस्ति। परोपकारिणः जनाः सर्वदा अन्येषां हितं कुर्वन्ति। अयम् एकः दिव्यः गुणः अस्ति। परोपकाराय जनाः कूपं, धर्मशालां पाठशालां च निर्माणयन्ति। परोपकारी जनः सर्वेषां प्रियः वन्दनीयः च भवति। परोपकारेणैव संसारे मनुष्यस्य प्रतिष्ठा अस्ति। प्रकृतिरपि परोपकारं करोति। वृक्षाः परोपकाराय फलन्ति मेघाः च वर्षन्ति। सज्जनानां सर्वाणि वस्तूनि परोपकाराय एव भवन्ति। मुनिः दधीचिः परोपकाराय स्वप्राणान् त्यक्त्वा अस्थीनि अपि ददौ। गौतमबुद्धः प्राणिनां दुःखविनाशाय महता कष्टेन तपः अकरोत् बोधत्वं च प्राप्नोत्। शास्त्रेषु परोपकारस्य महिमा बहुशः वर्णिता। वस्तुतः अस्मिन् संसारे परोपकारिणां जीवनम् एवं सार्थकम् अस्ति। अतः वयम् अपि परोपकारिणः भवेम।

(क) एक पदेन प्रश्नानाम् उत्तराणि लिखत :– 1×2=2
(i) परेषां जनानाम् उपकारः किं कथ्यते ?
(ii) कः परोपकाराय स्वप्राणान् त्यक्त्वा अस्थीनि ददौ ?

(ख) पूर्ण वाक्येन उत्तरत :– 2×2=4
(i) परोपकारी जनः कीदृशः भवति ?
(ii) गौतमबुद्धः प्राणिनां दुःखविनाशाय किम् अकरोत् ?

(ग) यथानिर्देशम् उत्तरत :– 1×2=2
(i) 'सर्वाणि' इति विशेषणपदस्य विशेष्यपदं लिखत।
(ii) 'मेघाः' इति कर्तृपदस्य क्रियापदं लिखत।

(घ) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 2

## खण्ड – 'ख' (रचनात्मकं लेखनम्)

3. आपदाग्रस्तग्रामे सहायतार्थं मुख्यमन्त्रिणं प्रति निम्नलिखितं पत्रं मञ्जूषायां प्रदत्तैः समुचितैः शब्दैः पूरयित्वा उत्तरपुस्तिकायां लिखत – 1×5=5

सेवायाम्,

माननीयाः मुख्यमन्त्री महोदयाः

उत्तराखण्ड शासनम्

देहरादून।

महोदय!

सविनयं (i)........................यत् मम जनपदे (ii)....................महती आपदा आगता। मम ग्रामः अपि आपदाग्रस्तः जातः। जनानां भवनानि (iii)....................जातानि। महती जनधनहानिः अपि अभवत्। कृपया शासकीय सहायतया (iv)......................साहाय्यं कुर्वन्तु।

महती कृपा (v)..........................।

भवदीयः

समस्त ग्रामजनाः

बड़ोनी ग्रामस्य

रुद्रप्रयाग जनपदः

| मञ्जूषा – ग्राम्यजनानाम्, अतिवृष्टिकारणात्, भविष्यति, निवेद्यते, ध्वस्तानि |
|---|

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत – 1×5=5

प्रणवः – वयस्य! किं जानासि ? श्वः श्रावणीपूर्णिमा...............................।

प्राञ्जलः – आम्, श्रावणी पूर्णिमायां तिथौ...........................................भवति।

प्रणवः – भगिनी भ्रातुः हस्ते रक्षासूत्रं..................................................।

प्राञ्जलः – मित्र! अस्मिन् एव दिने.............................................. अपि भवति।

प्रणवः – आम्, मित्र! सर्वे विद्वांसः ........................................ प्रतिपादयन्ति।

| मञ्जूषा – बध्नाति, भविष्यति, संस्कृत दिवसः, संस्कृतभाषायाः महत्त्वं, रक्षाबन्धनं |
|---|

5. 'स्वतन्त्रता दिवसः' इति विषयम अधिकृत्य निम्नांकित मञ्जूषातः शब्दान् चित्वा पञ्चवाक्यानि लिखत। 2×5=10

| मञ्जूषा – राष्ट्रिय उत्सवः, अगस्तमासे, स्वाधीनः, समारोहः, ध्वजारोहणं, लालकिला प्राचीरे, भाषणानि, श्रद्धाञ्जलिं |
|---|

## खण्ड – 'ग' (अनुप्रयुक्त व्याकरणम्)

6. अधोलिखितेषु रेखांकितपदेषु सन्धिं/सन्धिविच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत – 1×3=3

(क) श्वेतकेतुः <u>विद्याध्ययनाय</u> गुरुकुलं गच्छति। (ख) कक्षायां <u>को+अपि</u> छात्रः नास्ति।

(ग) <u>गङ्गा+उदकम्</u> मलिनं मा कुरु।

7. रेखांकित पदेषु समासं/समासविग्रहं कृत्वा लिखत – 1×4=4

(क) <u>राष्ट्रभक्तिं</u> कुरु। (ख) <u>ग्रामस्य समीपं</u> नदी वहति।

(ग) <u>लम्बोदर</u> नमस्तुभ्यम्। (घ) वस्तुतः संसारे <u>माता च पिता च</u> एव ईश्वररूपे भवतः।

8. रेखांकित पदेषु प्रकृति–प्रत्ययौ संयोज्य वाक्यानि उत्तरपुस्तिकायां लिखत – 1×5=5

(क) त्वया सत्साहित्यम् अवश्यमेव <u>पठ+तव्यत्</u>। (ख) <u>गम्+शतृ</u> छात्रः पुस्तकं पठति।

(ग) <u>धर्म+ठक्</u> जनः सन्मार्गम् अनुसरति। (घ) मम विद्यालये एका <u>शिक्षक+टाप्</u> अपि शिक्षणकार्यं करोति।

(ङ) मथुरा–नगरी <u>दृश्+अनीयर्</u> अस्ति।

9. मञ्जूषायाः सहायतया निम्नलिखित वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत – 1×5=5

(क) अद्य रविवासरः अस्ति,.........सोमवासरः भविष्यति। (ख) लता.....................विद्यालयं गच्छति।

(ग) मेलापके जनाः..................भ्रमन्ति।

(घ) ये छात्राः परिश्रमेण पठन्ति ते........उत्तीर्णाः भवन्ति।

(ङ) मम मित्रम्..........मया सह मुम्बई नगरं गमिष्यति।

| |
|---|
| **मञ्जूषा** – नूनम्, शनैः–शनैः, अपि, श्वः, इतस्ततः |

10. अधोलिखित वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत – 1×3=3

(क) बालिकया सुलेखं लिख्यते।

(ख) छात्राः विद्यालयं गच्छन्ति।

(ग) सः स्वकार्यं करोति।

11. घटिकां दृष्ट्वा शब्देषु लिखत, शोभितः कदा किं करोति ? 1×4=4

(क) 

प्रातः 4.00 बजे

(ख) 

प्रातः 9.15 बजे

(ग) 

सायं 4.45 बजे

(घ) 

रात्रि 10.30 बजे

(क) शोभितः ब्रह्ममुहूर्ते.....................वादने शयनात् उत्थाय स्वाध्यायं करोति।

(ख) सः.....................................वादने विद्यालयं गच्छति।

(ग) सायंकाले.................................. वादने सः मित्रैः सह क्रीडनाय गच्छति।

(घ) रात्रौ.......................................वादने सः शयनाय गच्छति।

12. अधोलिखितवाक्येषु अङ्कानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानपूर्तिं संस्कृतेन कृत्वा लिखत – 1×2=2

(क) मम विद्यालये (16)........................अध्यापकाः सन्ति।

(ख) मम ग्रामे (50).......................................भवनानि सन्ति।

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यम् उत्तरपुस्तिकायां लिखत – 1×4=4

(क) सायंकाले त्वं कुत्र <u>क्रीडति</u>।

(ख) ग्रीष्मावकाशे अहं स्व पित्रा सह दिल्लीनगरं <u>गमिष्यामः</u>।

(ग) ह्यः मोहनः कक्षातः अनुपस्थितः <u>अस्ति</u>।

(घ) मम कक्षायाः एका छात्रा गणतन्त्रदिवस समारोहे देशभक्तिगीतं <u>गास्यतः</u>।

## खण्ड – 'घ' (पठित अवबोधनम्)

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरपुस्तिकायाम् उत्तरत –

यद्यपि दैवः प्रकोपो भूकम्पो नाम, तस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते। प्रकृति समक्षमद्यापि विज्ञानगर्वितो मानवः वामनकल्प एव तथापि भूकम्परहस्यज्ञाः कथयन्ति यत् बहुभूमिकभवननिर्माणं न करणीयम्। तटबन्धं निर्माय बृहन्मात्रं नदीजलमपि नैकस्मिन् स्थले पुञ्जीकरणीयम् अन्यथा असन्तुलनवशाद् भूकम्पस्सम्भवति। वस्तुतः शान्तानि एव पञ्चतत्त्वानि क्षितिजलपावकसमीरगगनानि भूतलस्य योगक्षेमाभ्यां कल्पन्ते।

(क) एक पदेन उत्तरत –

(i) कस्योपशमनस्य न कोऽपि स्थिरोपायो दृश्यते ? 1

(ख) पूर्णवाक्येन उत्तरत – 1×2=2

(i) भूकम्परहस्यज्ञाः किं कथयन्ति ?

(ii) पञ्चतत्त्वानि कस्य योगक्षेमाभ्यां कल्पन्ते ?

(ग) निर्देशानुसारम् उत्तरत– 1×2=2

(i) 'बृहन्मात्रं नदीजलम्' अत्र विशेष्यपदं किम् ?

(ii) अनुच्छेदे 'बौना' इति शब्दस्य पर्यायपदं किं प्रयुक्तम् ?

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत –

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः।।

(क) एक पदेन उत्तरत – 1

(i) निर्बलः किं न वेत्ति ?

(ख) पूर्णवाक्येन उत्तरत – 1×2=2

(i) वायसः कस्य गुणं न वेत्ति ?

(ii) सिंहस्य बलं कः न वेत्ति, कः वेत्ति च ?

(ग) निर्देशानुसारम् उत्तरत – 1×2=2

(i) 'गुणी' इति पदस्य विलोमपदं किम् अत्र प्रयुक्तम्।

(ii) 'कोकिलः' इति पदस्य पर्यायवाचिपदं श्लोकात् चित्वा लिखत।

16. अधोलिखितं नाट्यांशं पठित्वा तदाधारित प्रश्नान् उत्तरत –

रामः – (स्वगतम्) धिङ् मामेवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति। (सवाष्पमवलोकयति)

रामः – अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः ?

विदूषकः – (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी ?

लवः – तस्याः द्वे नामनी।

विदूषकः – कथमिव ?

लवः – तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

रामः – अपि च इतस्तावद् वयस्य! मुहूर्त्तयात्रम्।

विदूषकः – (उपसृत्य) आज्ञापयतु भवान्।

रामः – अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः ?

(क) एक पदेन उत्तरत – 1

(i) कस्याः द्वे नामनी ?

(ख) पूर्णवाक्येन उत्तरत – 1×2=2

(i) के देवीति नाम्नाह्वयन्ति ?

(ii) केषाम् सर्वथा समरूपः कुटुम्बवृत्तान्तः ?

(ग) निर्देशानुसारम् उत्तरत – 1×2=2

(i) 'कुतूहलेनाविष्टो' पदे सन्धिविच्छेदं कुरुत।

(ii) 'अतिदीर्घः प्रवासोऽयम्' अत्र विशेषणपदं लिखत।

17. अधोलिखित श्लोकयोः भावार्थम् उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत –

(क) सेवितव्यो महावृक्षः फलच्छायासमन्वितः। 1×3=3
यदि दैवात् फलं नास्ति छाया केन निवार्यते।।

भावार्थः –

फलछायापरिपूर्णः (i)...................... सर्वदा सेवनीयः भवति। दैववशात् (ii)...................... न आयान्ति चेत्, (iii)............................ तु अवश्यमेव भविष्यति।

(ख) एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्।।

**भावार्थः –** 1×3=3

काननेे एक एव स्वाभिमानी पक्षी (i)............................वसति। यः पिपासितः एव (ii).......................... परन्तु स्वाभिमानं त्यक्त्वा पृथिव्याः जलं न गृह्णाति। एवमेव स्वाभिमानी पुरुषः (iii)........................न त्यजति, मृत्युं वा प्राप्नोति।

18. अधोलिखित श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत –

(क) न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणम्।
न च व्यायामिनं मर्त्यमर्दयन्त्यरयो बलात्।।

**अन्वयः –** ½ ×3=1½

तेन (व्यायामेन) सदृशं (i)...........किञ्चित् न अस्ति। अस्यः (ii)..........मर्त्यम् च बलात् न (iii).........।

(ख) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

**अन्वयः –** ½ ×3=1½

हि मनुष्याणां शरीरस्थः महान् रिपुः (i).............................(अस्ति)। उद्यमसमः (ii).......................... नास्ति, यं कृत्वा न (iii)................................।

19. रेखांड्कित पदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत – 1×4=4

(क) शकटीयानम् <u>कज्जलमलिनं</u> धूमं मुञ्चति।
(ख) सा कन्या <u>अतिथिं</u> स्नानाय प्रेरितवती।
(ग) त्वं <u>मानुषात्</u> विभेषि।
(घ) <u>शिशुजनस्य</u> अद्य अशनं बलेन जातम्।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत– ½ ×8=4

(i) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।
(ii) प्रत्युत्पन्नमतिः सा श्रृगालम् आक्षिपन्ती उवाच।
(iii) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।
(iv) मार्गे सा एकं व्याघ्रं अपश्यत्।
(v) व्याघ्रं दृष्टवा सा पुत्रो ताडयन्ती उवाच – 'अधुना एकमेव व्याघ्रं विभज्य भुज्यत।'
(vi) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता।
(vii) 'त्वं व्याघ्रत्रयम् आनयितुं' प्रतिज्ञाय एकमेव आनीतवान्।
(viii) गलबद्ध श्रृगालकः व्याघ्रः पुनः पलायितः।

21. **'अ' स्तम्भे** दत्तानां पदानां समानार्थकम् पदं **'ब' स्तम्भे** दत्तम्। तौ यथोचितं योजयत – 1×3=3

| 'अ' | 'ब' |
|---|---|
| (क) अम्भसा | प्रकटयन्तः |
| (ख) विदार्य | जलेन |
| (ग) उद्गिरन्तः | संत्रोट्य |

********